CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 524

Title Rudrānuṣṭhāna paddhati

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: ~~402~~ 524. Subject: Vedic Rit.

Title: Rudrānuṣṭhana paddhati.

Author: Nārāyaṇa Sūri Scribe: Ramāśankara

Date of the work: – Date of the Ms.: V.S. १८94

Place of the work: Kāśi Place of the Ms.: Surat.

Size: 9.9" by 4.2" Extent: 31 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: —

॥ततोरुद्रपीठे लिंगतोभद्रं विरचयेत्॥ ३॥ तद्यथा॥ चतुर्विंशतिरालेख्यारेखाः प्रा
ग्दक्षिणगामताः॥ कोणेषु स्युः खल्लाः पंचपदावल्यस्तु पार्श्वतः॥ पदैर्नवभिरालेख्या
श्चतुर्भिर्लघुस्युंखल्लाः लघुवल्ल्यः पदैः षड्भिस्ततोष्टादशभिः पदैः लताल्लिंगा
निबाह्यस्के त्रयोदशाभिरंतरा ततोऽपि षड्विंशद्भयेनैव पीठं कुर्याद्विचक्षणः न
स्य पादाः पंचपादादाराण्यपि तथैव च एकादशाभिः पदैर्मध्ये पद्मस्वस्तिकमि
ष्यते कोणेषु स्युंखल्लाः कार्याः पदैस्त्रिभिरंततः परैः पदैश्चतुर्भिर्द्विकुस्तत्र
शाल्यपांसमंततः एकादशापदावल्यो मध्ये षट्लंमाल्लिखेत पश्चेनैव पदेषु
वै लिंगतोभद्रमिष्यते श्रृंखलाः तु सवर्णेन वह्नीनीलेन पूरयेत रक्तेन

श्वखण्डवीर्वृथीः पीतेन पूरयेत् लिंगानि तु सवर्णानि श्वेतेनाथ पवापिकाः
पीठं सपादं श्वेतेन पीतेन द्वारपूरणं मध्ये स्कः श्वेदलारक्ता वल्ली नीलेन पूरयेत्
भद्राणि पीतवर्णानि पीतां पंकजकर्णिकां दलानि श्वेतवर्णानि यद्वा चित्राणि क
ल्पयेत् तिस्रो रेखा बहिः कार्याः सितरक्तासिताः क्रमादिति अत्रापि प्रागु
क्ता ब्रह्माद्या मंडलदेवताः स्थापयेत् मध्ये कलशस्थापनं तदुपरि घटादौ
रुद्रयंत्रं रचयेत् यथा प्रणम्य जगतामीशं माहेशं धारिणम् यंत्रोद्धार
महं वक्ष्ये रुद्रकल्पानुसारतः मध्ये वृत्तं समालिख्य तन्मध्ये च दशाक्षरम्
बहिरष्टदलं पद्मं ततः षोडशपत्रकम् चतुर्विंशतिपत्रं च द्वात्रिंशत्पत्रकं तथा

चत्वारिंशत्पत्रकं तु वृत्तं स्त्यर्धसमप्रभम् पंचपद्मात्मकं वृत्तं चतुरस्रं चत्वरद्वे
सत्त्वरजस्तमश्चेति त्रिगुणैः परिवेष्टितं चतुर्द्वारं द्वारदेशे बहिर्नागसमावृ
तम् रुद्रपीठमिति ख्यातं देवतास्तत्र विन्यसेत् चत्वारिंशद्भूतं चैकं
देवतानामुदाहृतम् कर्णिकामध्यदेशे तु रुद्रं पंचास्यमालिखेत् नमो
भगवते रुद्राय इति तारादिकं न्यसेत् सोऽयं दशाक्षरो मंत्रः सर्वकामार्थसि
द्धिदः प्रणवादि नमोंतानि दशास्यानि ततः परं सद्योजातं वामदेवमघो
रं तदनंतरं ततस्तत्पुरुषं प्रोक्तमीशानं पंच च क्रमात् आधानमिदमा
ख्यातं जपभावरणे ततः दलेष्वष्टसु नंद्यादीन्पूर्वादिक्रमतो न्यसेत्

२

प्रत्यप्रत्नकयोर्मध्येप्राचीस्यार्धचंद्रलेखने आदौनंदिमहाकालौगणराट्वृष
भौक्रमात् भृंगिरिटिस्कंदोमाचंडेश्वरसंज्ञकाः षोडशारेततःपद्मे
द्वितीयावरणेयजेत् अनंतंचतथासूक्ष्मंशिवंचैकपदंतथा एकरुद्रं
त्रिमूर्त्तिंचश्रीकंठंवामदेवकं ज्येष्ठंश्रेष्ठंतथारुद्रंकालंकलविकरणं
बलंबलविकरणंबलप्रमथनंतथा तृतीयावरणेपद्मेचतुर्विंशद्दले
तथा अणिमामहिमाचैवतिलघिमागरिमातथा प्राप्तिःप्राकाम्यमीशित्वंव
शित्वंचाष्टसिद्धयः ततःपरंक्रमेणैवन्यसेद्ब्राह्म्यादिदेवताः ब्राह्मीमाहे
श्वरीचैवकौमारीवैष्णवीतथा वाराहींद्रीचचामुंडाचंडिकाचेतिताःक्रमात्

ततोष्टश्चासितांगादीन्भैरवान्विन्यसेत्पुनः असितांगोरुरुश्चंडःक्रोधउन्म
त्तभैरवः॥ कालभीषणसंहाराभैरवाश्चाष्टकीर्त्तिताः द्वात्रिंशत्पत्रकेप
द्मेभैरवाष्टकमुदाहृतं ततोनंतोवासुकिश्चतक्षकश्चकुलीरकः कर्को
टकःशंखपालःकंबलोश्वतरस्तथा ततोष्टसुन्यसद्वैन्यंपृथुंहैहयमर्जुनं
शाकुंतलेयंभरतंनलंराममितिक्रमात् ततःकुलाचलानष्टौदलेष्वष्ट
सुविन्यसेत् हिमवान्निषधोविंध्योमाल्यवान्पारियात्रकः मलयोहेमकू
टश्चगंधमादनसंज्ञकः चत्वार्यावरणान्येवंपंचमावरणेततः चत्वारिंश
द्दलेपद्मेपंचमावरणेन्यसेत् इंद्राद्यांष्टौलोकपालानष्टसुक्रमशोलिखेत्

५

शचीस्वाहाचवाराहीखड्गिनीवारुणीतथा मृगारूढाचकौबेरीशूलिनीचतथाष्टमी
ततोषांनामायुधानिवज्रादीन्यष्टसुन्यसेत् वज्रंशक्तिंदंडखड्गौपाशांकुश
गदाश्चापि त्रिशूलंलोकपालानामायुधानिक्रमाल्लिखेत् ततोष्टौवाहना
न्येषामष्टसुक्रमतोलिखेत् ऐरावतःपुंडरीकोवामनःकुमुदोंजनः पुष्पद
तःसार्वभौमःसुप्रतीकश्चदिग्गजाः अष्टदलंततःपुनर्लेख्याःपीचपञ्चकाब
हिः इंद्रंविन्यस्यपूर्वस्यामाग्नेय्यामग्निमेवच दक्षिणस्यांयमंचैव नैरृत्यां
तुनिरृतिं प्रतीच्यांवरुणंवायुंवायव्यांविन्यसेत्ततः कुबेरंचैवकौबेर्यामीशा
न्यामीशमालिखेत् विरूपाक्षंतुविन्यस्यचाग्नेय्यामग्नियोगतः नैरृत्यांनि
रृतेर्योगेविश्वरूपंचविन्यसेत् वायव्यांवायुयोगेचलिखेत्पशुपतिंतथा ईशान्या

मूर्ध्वलिंगंचन्यसेदीशानयोगतः प्रागादिक्रमतोलेख्याःशेषाद्याअष्टदलाद्बहिः विप्र
वर्णंश्वेतरूपंसहस्रफणमंडितं शेषंविन्यस्यपूर्वस्यांपूजयेदुपचारकैः तक्षकंवै
श्यवर्णंचनीलंपंचशतैःफणैः मुक्तमुत्तुंगकायंचआग्नेय्यांदिशिविन्यसेत्
अनंतंविप्रवर्णंचतथाकुंकुमवर्णकं सहस्रफणिसंयुक्तंदक्षिणस्यांप्रपूजयेत्
वासुकिंक्षत्रियंपीतवर्णंसप्तशतैःफणैः मुक्तमुत्तुंगकामंचनैरृत्यांदिशिवि
न्यसेत् शंखपालंक्षत्रियंचपीतंसप्तशतैःफणैः युक्तमावाह्यवारुण्यांचवा
यव्यांदिशिप्रपूजयेत् कंबलंशूद्रवर्णंचकृष्णंत्रिंशत्फणैर्युतं कौबेर्यांदिशि
विन्यस्यपूजयेच्चविधानतः कर्कोटकंशूद्रवर्णंश्वेतंत्रिंशत्फणयुतं

ईशान्यां दिशि विन्यस्य पूजयेद्विधिवत्ततः रुद्रपीठमिदं सर्वं रुद्रकल्पे च विश्रुतं
शंभुना स्वयमाख्यातं भक्त्यानुग्रहकाम्यया कुंकुमागरुकर्पूरैर्भूर्जपत्रेथवा
पटे लिखितं पूजितं भक्त्या सर्वकार्यसिद्धिदं यंत्रमंत्रमयं प्रोक्तमाख्यातादे
वतोतिच पूजनीयं प्रयत्नेन तेनेदं देवतामयं नाग्निचौरभयं तत्र न च राज
भयं क्वचित् यत्रेदं लिखितं यंत्रं पूज्यते विधितः सदा इति श्रीस्कंदपुराणे
स्कंदमहादेवसंवादे रुद्रयंत्रं तद्यथा कर्णिकायां ॐ नमो भगवते रुद्राय इति दशा
क्षरः ततः प्रथमकोष्ठ एव प्रागादिक्रमेण मध्ये च ॐ सद्योजाताय नमः वाम
देवाय० अघोराय० तत्पुरुषाय० ईशानाय० ततः प्रागादिक्रमेण नंदी महाकालः

गणेश्वरः वृषभः भृंगिरीटिः स्कंदः उमा चंडीश्वरः इति प्रथमावरणं अनंतः सूक्ष्म
शिवः एकपात् एकरुद्रः त्रिमूर्तिः श्रीकंठः वामदेवः ज्येष्ठः श्रेष्ठः रुद्रः कालः
कलविकरणः बलः बलविकरणः बलप्रमथनः इति द्वितीयावरणं अणिमा म
हिमा लघिमा गरिमा प्राप्तिः प्रकाम्यं ईशिता वशिता ब्राह्मी माहेश्वरी कौ
मारी वैष्णवी वाराही ऐंद्री चामुंडा चंडिका असितांगभैरवः रुरुभैरवः
चंडभैरवः क्रोधभैरवः उन्मत्तभैरवः कालभैरवः भीषणभैरवः संहारभैर
वः इति तृतीयावरणं भवः शर्वः ईशानः पशुपतिः रुद्रः उग्रः भीमः म
हान् अनंतः सूक्ष्मः शिवः वासुकिः तक्षकः कुलीरः कर्कोटकः शंखपालः
कंबलः अश्वतरः वैन्यः पृथुः हैहयः अर्जुनः शाकुंतलेयः भरतः नलः रामः हिमवान्

निषधः विंध्यः माल्यवान् पारियात्रकः मलयः हेमकूटः गंधमादनः इति चतुर्थं
इंद्रः अग्निः यमः निर्ऋतिः वरुणः वायुः कुबेरः ईशानः शचीस्वाहा वाराही खड्गिनी
वारुणी वायवी कौबेरी ईशानी वज्रम् शक्तिः दंडः खड्गः पाशः अंकुशः गदा त्रि
शूलं ऐरावतः मेषः महिषः प्रेतः मकरः हरिणः नरः वृषभः ऐरावतः पुंडरीकः
वामनः कुमुदः अंजनः पुष्पदंतः सार्वभौमः सुप्रतीकः इति पंचमावरणं एवं
पंचपञ्चानि कृत्वा बहिश्चतुष्कोणे मण्डले तत्र पूर्वे इंद्रः आग्नेय्यामग्निः विरू
पाक्षश्च दक्षिणस्यां यमः निर्ऋत्यां निर्ऋतिः विश्वरूपश्च पश्चिमायां वरुणः
वायव्यां वायुः पशुपतिश्च उत्तरे कुबेरः ईशान्यामीशानः ऊर्ध्वलिंगं च ततो
रुद्राद्बहिः पूर्वे विप्रवर्णं श्वेतं सहस्रफणं शेषं स्थापयेत् वैश्यवर्णं नीलं पंचशतफणं विरू

पितं तक्षकमाग्नेय्याम् विप्रवर्णं कुंकुमाभं सहस्रफणमनंतं दक्षिणे क्षत्रियवर्णं
पीतं सप्तशतफणायुतं वासुकिं निर्ऋत्याम् क्षत्रियवर्णं सप्तशतफणायुतं शंख
पालं पश्चिमे वैश्यवर्णं नीलं पंचशतफणायुतं महापद्मं वायव्यां शूद्रवर्णं कृष्णं
त्रिंशत्फणायुतं कंबलमुत्तरे शूद्रवर्णं श्वेतं त्रिंशत्फणायुतं कर्कोटकमीशान्याम्
एतैः प्रणवादिनमोंतनामभिरेताद्देवता आवाह्य पूज्याः इति स्कंदानुसारेण रुद्र
पीठदेवताः ततो रुद्रपीठादीशानदिग्भागे पूर्णकलशं निधाय रुद्रजपार्थं बेन
ब्राह्मणं वृणुयात् तत आचार्योऽग्निसमीपमागत्याग्नेः पश्चिमत उपविश्य द्वे
तिस्रो वा समिध आदायान्वाधानं कुर्यात् तत्रास्मिन् रुद्रहोमे देवतापरिग्रहार्थं

मित्यादिचक्षुषी आज्येनेत्यंतमुक्त्वा सग्रहपक्षेग्रहानमुकसंख्याभिरर्कादिसमिद्भिश्च रु
पक्षेमुकसंख्यचर्वाहुतिभिः ऋतस्यतपस्यदर्शेनामुकद्रव्येणचेत्युक्त्वा अधिदेवता
धंगकत्वपक्षेऽधिदेवतादीनमुकद्रव्येणेत्युक्त्वा रुद्रममुकहोमपक्षेणामुकमंत्र
विभागपक्षेणामुकद्रव्येणेत्युक्त्वा रुद्रपीठदेवताएकैकयाज्याहुत्येत्युक्त्वा
शेषेणस्विष्टकृतमित्यादित्युक्त्वा व्याहृतिभिःसमिधोसमिधोवान्जुहुयात्
ततोद्रव्येणाहुतिसंख्यामंत्रविभागश्चवक्ष्यते ततःपरिस्तरणमग्नेःकुर्यात्
तत्रद्वितीयमेखलायांपश्चिमेयोनिरंध्रेकार्यं शाखांतरीयाणांपरिधिनिधा
नमप्यत्रैव ततःपर्युक्षणादिप्रणीताप्रणयनांतेकृतेआचार्योब्रह्माणंपूर्ववृतमेवा

सनेदक्षिणतउपवेशयेत् पूर्वंयजमानवृतस्यैवब्रह्मणःपुनर्वरणस्यवैयर्थ्यात् ततः
प्रणीताप्रणयनेकृतेब्रह्मणिचरुपक्षेतत्संनिवापादिचरुश्रपणेकृतेआज्यसं
स्कारेचरुणातिलादिद्रव्येणचसहाज्येपर्यग्निकृत्वाज्यासादनान्यभागांतंकुर्या
त् तत्रयजमानोग्नेर्दक्षिणतोब्रह्मणःपश्चिमतउपविश्य सावधानउद्देशत्या
गौकुर्यात् तत्रस्वयमेवचेद्धोमंकरोतिनत्वाप्रत्याहुतिस्त्यागेइदंनममेत्यादितत्त
देवताभ्यस्त्यागंकुर्यात् यदात्वृत्विजःप्रतिनिधयोवाहोमंकुर्युः तदायजमानआ
ज्यभागानंतरंवक्ष्यमाणाःसर्वादेवताउद्दिश्यहोष्यमाणानिचसर्वाणिनिर्दिश्ये
तान्योदेवताभ्यइदमिदंद्रव्यंमहाम्त्युत्सृजायामेतित्यजेत् बहुऋत्विगादिकर्तृकेहोमे

प्रत्याहुतित्यागस्यकर्तुमशक्यत्वात् नोक्तमिति अद्वावल्कर्तृकत्वात् त्यागपूर्वक
त्वाच्चहोमस्यसर्वहोमानंतरंत्यागस्याप्युक्तत्वात् इदानीमेवैवंत्यागः कार्यइति
शिष्टाः ततआचार्यादयःसावधानायजमानाभीष्टसिद्धिंप्रार्थयंतोहोमंकुर्युः
तत्रग्रहपक्षेग्रहाणांसमिधः अर्कः पलाशः खदिरः अपामार्गो पिप्पलः
उदुंबर शमी दूर्वा कुशाश्चसमिधःक्रमादिति तत्संख्याचाष्टोत्तरंशत
मष्टाविंशतिरष्टौवैकैकस्यसमिधश्चमधुसर्पिर्दधिरूपत्रिमध्वक्ताःकार्याः
दधिस्थानेदुग्धंवा चरुस्तुहुताहुतः करणपक्षेपिप्रत्येकमेकाष्टाविंश
त्यष्टोत्तरशताहुतिपक्षाः तत्रैकाहुतिपक्षेस्रुचावदानधर्मेणाचार्योजुहुयात्

अष्टाद्याहुतिपक्षे तु चतुर्मुष्टिनिर्वापानंतरं मंत्रनिर्वापेनचरुंबद्ध्वानिर्मायाचार्यादयः
सर्वेहस्तेनैवजुहुयुः ततोवशिष्टःसंतप्तरूपस्यदर्शीशेनतिलैर्यवैर्मिश्रिते
व्रीहिनिर्वापंजुहुयुः स्वतंत्रब्राह्मणपक्षे सएवजुहुयात् अधिदेवताद्यंगत्वपक्षे
त्रयोविंशतिदेवतानांसमिच्चरुतिलादीनांसमानसंख्येनजुहुयात् तत्रसमिधः
पालाश्यः निर्वापश्चैतेभ्योपिनिर्वापः अधिदेवतादीनांचसमिच्चरुहोमसंख्या
ग्रहसंख्यातोन्यूनाकार्येतिशिष्टाः चवैकाहुतिपक्षस्तत्रापिसाधारणः एषां
समिधःक्रान्निष्टपक्षेप्रत्येकंचतस्रइतिशिष्टाः समिच्चरुसंख्यासमानैवचै
षांतिलादिद्रव्याहुतिसंख्याबोद्धव्या इंद्राद्यष्टाधिकांगत्वेपि अधिदेवताधिदेवतेभ्यो

पिरोमः कार्यः ग्रहादीनां मंत्रास्तु तत्तच्छंदो दैवतादि च ग्रहपीठप्रतायामुक्तं मंत्राहुति
प्रमाणं तत्र सर्वाः समिधः प्रादेशमात्रा रुज्व्यो नातिशुष्का ह्याद्राः तत्र दूर्वाणां तिस्र
णांमेकैकाहुतिः कुशस्यत्वग्र्याद्दि बहुपत्रस्यैव अर्काद्यलाभे पालाश्यः प्रतिनिधेयः
चरोस्त्वेकाहुतिपक्षे अंगुष्ठपर्वावदानरूपमवदानं अन्यपक्षेषु ग्रासमात्रं
तिलादीनां तु प्रसृतिमात्राद्धृग्दशापर्वपूरिकावेतिप्रमाणेउत्तमे अष्टसहस्रम
ष्टशतं वेति मध्यमे चतुरशीतिश्चतुःषष्टिर्वेकनिष्ठे अत्राहुतिसंख्या तत्रन
वग्रहसमिधी नवशतीद्वासप्ततिश्च यद्वा द्विशती द्विपंचाशच्च अथवा द्विसप्त
तिरेव तेषामेव चरुपक्षे एकाहुतिपक्षे नव अन्यपक्षत्रये समित्समानैव संख्याः

तिलादिनां तपक्षांशस्तु सहस्राणि नव नवशतानि नवतिर्वेति अधिदेवतादिपक्षे
त समिधां षट्शती चतुश्चत्वारिंशच्च शतं चतुरशीतिश्च वा द्वानवतिर्वा चरुपक्षेत
स्य षट्शती चतुश्चत्वारिंशच्च शतं चतुरशीतिश्च वा त्रयोविंशतिर्वा तिलादेस्तु वि
कल्पेन समिच्चरुसमैव संख्येति इंद्रादिपक्षे तत्समिधां द्विशती चतुर्विंशतिश्च
चतुःषष्टिर्वा द्वात्रिंशद्वा चरुपक्षे तस्य द्विशती चतुर्विंशतिश्च चतुःषष्टिर्वाष्टौ वा
तिलादेस्तु समिच्चरुसंख्यैवेति तत्पक्षे सर्वाः संख्या एकीकृत्य महासंख्या बोद्ध
व्या अत्र च कनिष्ठपक्षाश्रयणेऽपि संगतैव मध्यमोत्तमपक्षाश्रयणे तु ततः फ
लेतारतम्यं द्रष्टव्यं एवं ग्रहहोमं विधाय ततः प्रागुक्तन्यासपूर्वकं प्रागुक्तार्षेयादि

स्मरणपूर्वकं श्रीरुद्रं ध्यायन् स्वयं कुर्यात् अशक्तावेवंविधाः प्रतिनिधयो कुर्युः
अत्राद्यर्थे महारुद्रे त्वेवमृत्विजो कुर्युः तत्र द्रव्याणि कृष्णतिलाः यवमिश्रितानि
उभये व्रीहयः आज्यं वा तिपुत्रार्थं महारुद्रे त्वाज्यपरिप्लुता दूर्वाः अथ होमः प्रधानत्र
ते होमस्त्रेधा समग्रहोमः दशांशहोमः शतांशहोमश्चेति
कामपत्रानुपद्धत्युक्तं रुद्रैकपरुद्रांगहोमे चरुद्राद्विपंचरूपिहोमेषु अथ तत्पक्षसी
गन्तोहोमे होमरुद्रे तु पंचरूपि समग्रहोमे एव तत्रैतेषु त्रिष्वपि पक्षेषु षड्भिः
कौप्रैः मंत्रविभागः एकधा त्रेधा षोढा षोडशधा अष्टाचत्वारिंशद्धा एको
नसप्तत्युत्तरशतधा चेति अयं च नमकविभाग एव चमकेषु तु एतत्पक्ष

प्रदर्शन एव विशेषः स्पष्टं भविष्यति एतत्पक्षप्रदर्शने एव च नमकचमकसंख्या
प्रच्यते तत्रैकधा विभागस्तावद्रूपे समस्तनमकाध्यायेनैका आहुतिः चमके
घृतं चाविक्ष इत्यृचा एकामाहुतिं कृत्वा वाजश्च म इत्यादिसमग्राध्यायेनापरा आ
हुतिरिति यद्वाग्नाविष्णू इत्यैको एकादश चमकानुवाकैरेकादशेति ततश्च
रूपे समग्रहोमे एकधा पक्षे तिस्रस्त्रयोदश वाहुतयो भवंति त्रेधा विभा
गे पिरूपे आद्यैश्चतुर्भिरनुवाकैरेका आहुतिः अपरैश्चतुर्भिर्द्वितीया शेषैस्त्रि
भिस्तृतीया यद्वा नमस्ते इत्यतः सभापतिभ्यश्च वो नम इत्यंतेनैका नमो अश्वे
भ्य इत्यारभ्य नमः पार्याय चावार्याय चेत्यंतेनापरा नमः प्रतरणाय चेत्यारभ्य स

माग्निपर्यंतेनतृतीयेति चमकेपदद्वयंप्राग्वत् ततश्चरूपेसमग्रहोमेत्रे
धाविभागपक्षेपंचपंचदशावा आहुतयः षोढाविभागोपिरूपेत्रेधाविभागव
देवाद्यविभागाभ्यामाहुतिद्वयं तृतीयविभागेयएतावंतइत्युगंतेनतृ
तीया आहुतिः नमोरुद्रेभ्योयेपृथिव्यामित्यादौच नमोरुद्रेभ्योयेपृथिव्यांये
षामन्नमिति० नमोरुद्रेभ्योयेंतरिक्षेयेषांवात० इति नमोरुद्रेभ्योयेषांव
वर्ष०मितिच इत्यादिवाक्यशेषसहितैस्त्रिभिर्यजुर्भिराहुतित्रयमिति
चमकेपूर्ववत्पदद्वयं ततोरूपेसमग्रहोमेषोढाविभागपक्षे अष्टावष्टा
दशावा आहुतयः । षोडशधाविभागोरूपेनमस्तइत्यारभ्यनमस्तक्षभ्य

इत्यंतेनप्रथमा आहुतिः रथकारेभ्यइत्यतोनमःस्वायुधायचेत्यंतेनद्वितीया सु
धन्वनेचेत्यंतेषुसहस्राणिसहस्रशइत्येतद्वयं तेनतृतीया सहस्राणिस
हस्रशइत्यतः स्तेषां सहस्रयोजनइत्यर्द्धर्चप्रत्येकंसंबंधेनदशमंत्रैर्द
शाहुतयः नमोरुद्रेभ्यइतिचप्राग्वत्त्रिभिर्यजुर्भिस्तिस्रइति चमकपद
द्वयमुक्तं ततश्चरूपेसमग्रहोमेषोडशधाविभागपक्षे अष्टादश अष्टा
विंशतिर्वा आहुतयः अष्टाचत्वारिंशद्धाविभागोपिरूपेनमस्तइतिप्रथ
मानुवाकऋग्भिःपंचदशाहुतयः तत्राष्टमोमंत्रःपदद्वारः ततोष्टभिरनु
वाकैरष्टौ दशमेनुवाकेद्वादशभिर्द्वादश एकादशानुवाकेप्राग्वद्दश

निर्दशान्नमोरुद्रेभ्यइति पूर्ववद्भिर्यजुर्भिस्त्रयइति चमकेप्राचीनंपक्षद्व
यं ततश्चरूपेसमग्रहोमेपंचाशच्छिवाआहुतयः एकोनसप्तत्यु
त्तरशतधापक्षे आद्यानुवाकेपंचदश द्वितीयतृतीयचतुर्थानुवाके
ष्वन्यतोनमस्कारैः सप्तचत्वारिंशद्भिर्यजुर्भिःसप्तचत्वारिंशत् पंच
मषष्ठसप्तमाष्टमनवमानुवाकेषुपुरस्तान्नमस्कारैर्द्वशीतिनिर्यजुर्भि
र्द्वशीतिः एष्वपियजुःषुउभयतोनमस्कारत्वंकेचिदिच्छंति तच्चनमो
भवायचरुद्रायचनमइतिपठित्वा नमेवनमःशब्दंपुनरावर्त्यनमःशर्वा
यचपशुपतयेचनमइतिपठेदित्यादिज्ञेयं तत्रपक्षद्वयेपिनमोवःकि

रिकेभ्यइत्यादिमंत्रचतुष्टये देवानांहृदयेभ्यइति प्रत्येकमावर्त्तनीयं अयंच
नमोवःकिरिकेभ्यइत्यत्र सहस्राणिसहस्रशइत्यत्र नमोरुद्रेभ्योयेपृथि
व्यामित्यत्रच योनुषंगउक्तः समदायेनैमंत्रैःप्रत्येकंहोमस्तदैव यदा
तुनैभिःप्रत्येकंहोमस्तदाजपेएकधाहोमादावभिषेकेपारायणेचयथा
ध्यायनमोवःपाठः ततोदशमानुवाकेद्वादशभिर्द्वादशाहुतयः एकाद
शानुवाकेप्राग्वद्दशभिर्मंत्रैर्द्वाशीतिर्नमोरुद्रेभ्यइतित्रिभिर्यजुर्भिस्ति
स्रइति चमकेचपक्षद्वयंप्राक्तनं ततश्चरूपेसमग्रहोमे एकोनसप्तत्य
त्तरशतधाविभागपक्षे एकसप्तत्युत्तरशतं एकाशीत्यधिकशतंवा

रूपेदशांशशतांशहोमेच मंकेचपक्षद्वयंप्रागुक्तं न रूपेसमग्रहोमो
न भवति एवंवक्ष्यमाणदशांशशतांशहोमे वशिष्ठरूपदशांशशतांशहो
मोनेतिकेचित् सर्वत्ररूपेआद्यविभागत्रयेदशांशाद्यसंभवेपिउत्तरविभा
गत्रयेदशांशादिप्राप्तिरस्तीत्यन्ये अयमेवचाशिष्टैरादृतःपक्षः तत्ररूपे
दशांशहोमेषोडशधाविभागपक्षे आहुतिद्वयंदशांशः अर्द्धाधिकेअल्पांतर
त्वेनसमस्ताहुतिग्रहणात् तत्राद्याभ्यांमंत्राभ्यां यद्वाआद्येनांतेनचमंत्रे
णेतियाज्ञिकाः तत्रैवाष्टाचत्वारिंशत्पक्षेपंचाहुतयोदशांशः तत्राद्यैरे
वपंचभिर्यद्वाद्वाभ्यांद्वाभ्यामंत्याभ्यांत्रिभिर्वेतिपक्षद्वयं तत्रैवैकोनसप्ततिपु

तरमंत्रपक्षेसप्तदशाहुतयोदशांशः तत्राप्याद्याएवसप्तदश आद्यानव
चांत्याअष्टौवेतिपक्षद्वयं रूपएवषष्ठेपक्षेशतांशआहुतिद्वयं प्रागवन्मंत्रा
ज्ञेयं यत्रसमग्रेणनमकरूपेणहोमस्तत्रैवचमकाहुतिर्नान्यत्र ते
नैतेषुत्रिष्वपिपक्षेषुनचमकाहुतिः रुद्रैस्तुसमग्रहोमेएकधावि
भागेएकादशनमकाहुतयः चमके चाग्नाविष्णू इत्यकाएकादश
[illegible]त्रिश्चमकानुवाकैर्नमकप्रतिरूपयोजितैरेकैकेतिद्वादशसर्वासंख
योविंशतिराहुतयः तत्रैवत्रेधाविभागेनमकानीत्रयस्त्रिंशच्चम
कानीप्रागवद्द्वादशेतिसर्वाःपंचचत्वारिंशत् तत्रैवषोडशविभा

गेन नमकानां षडधिका षष्टिः चमकाकृतिभिः सहाष्टसप्तभिः तत्रैव षो
डशधा धा विभागेन नमकानां षट्सप्तत्युत्तरंशतं चमकाकृतिभिः सहा
ष्टाशीत्यधिकं शतं तत्रैवाष्टाचत्वारिंशसद्धे नमकानां षष्टाविंश
त्यधिका पंचशा चैतीमकैः सह चत्वारिंशदधिका तत्रैवैको
नसप्तत्युत्तरशतधा विभागेन नमकानां षष्ठादशशतान्येकोनषष्टि
श्च चमकैः सहसैकासप्ततिरिति रुद्रांदशांशहोमेरूपेसमग्नदो
म एकधा विभागादिषट्कल्पेषु यासंख्योक्ता सैवात्र बोद्धव्या तत्र षोडश
धा विभागादिपक्षे ऽवशिष्टरूपस्य दशांशरूपाद्धि पंचसप्तदशसंहिताः

क्रमेण प्रागुक्तैव संख्या बोद्धव्या तद्यथा विंशतिस्त्रिंशद्वा पंचपंचाश
त्पंचषष्टिर्वा एकोननवतिर्नवनवतिर्वेति रुद्राणां शतांशहोमः षोड
शधा विभागादिपक्षत्रय एव संभाव्यते तत्र नमके प्राग्वदाकृतिद्वयं
चमके चोक्तं पक्षद्वयमिति च तस्तश्चतुर्दशवा षोडशधा विभागश्चाकृत
यः अष्टचत्वारिंशद्धा विभागे तु नमके प्राग्वत्त्रैव चमके द्वौ पक्षाविति
सप्तसप्तदशवाश्चाकृतयो भवंति एकोनसप्तत्युत्तरे विभागे तु न
मके षोडश चमके पक्षद्वयमिति विंशतिस्त्रिंशद्वेति लघुरुद्रेस
मग्रहोमे एकधा पक्षे एकविंशत्युत्तरशतं नमकानीतावत्यश्चा

उक्तयः चमकानां द्वात्रिंशदुत्तरं शतमिति त्रिपंचाशदधिकं शतद्वयमनुक्तयः
तत्रैव त्रेधाविभागेन चमकानां त्रिषष्ट्यधिकं शतत्रयं चमकानां मनंतरो
क्ता एवेति चतुःशतानि पंचनवतिश्च तत्रैव षोढाविभागपक्षे चमका
नां सप्तशतानि षड्विंशतिश्च चमकानां तावंत्य एवेति सर्वा अष्टशता
न्यष्टपंचाशच्च तत्रैव षोडशधाविभागेन चमकानां सहस्रं नवश
तानि षड्विंशच्च चमकानां तावत्य एवेति सर्वाः सहस्रद्वयमष्टषष्टिश्च
तत्रैवाष्टाचत्वारिंशत्पक्षे चमकानां पंचसहस्राणि अष्टौ शतान्यष्टौ च
चमकानामुक्ता एवेति सर्वाः पंचसहस्राणि नवशतानि चत्वारिंशच्च

तत्रैकोनसप्तत्युत्तरशतपक्षे चमकानां विंशति सहस्राणि चत्वारि शता
न्येकोनपंचाशच्च चमकानां ता एवेति सर्वा विंशति सहस्राणि पंच श
तानि एकाशीतिश्च लघुरुद्र एवं दशांशहोमे एकधा पक्षे द्वादशरू
पकाणि दशांशा इति चमकानां द्वादशानुकृतयः चमकानां च रूपके प्रक्र
मेण द्वादशेति सर्वाश्चतुर्विंशतिः तत्रैव त्रेधा विभागेन चमकानां षट्त्रिं
शत् चमकानुकृतिभिः सह अष्टाचत्वारिंशत् तत्रैव षोढा विभागेन चमका
नामेकं शतं द्वानवतिः अवशिष्टरूपस्य च प्राग्वद्वेदेव चमकैः द्वे शते
षट् च तत्रैवाष्टाचत्वारिंशद्विभागे चमकानां पंचशतानि षट्सप्ततिः

अवशिष्टरूपस्याष्टावृत्तं च चमकैः सह पंचशतानि त्रिनवतिश्च तत्रैवैको
नसप्तत्युत्तरशतानि विभागेन नमकानां द्वे सहस्रे षड्विंशतिः अवशि
ष्टरूपेणाष्टावसप्तदशावृत्तयः चमकैः सह द्वे सहस्रे सप्तपंचाशदावृ
त्तयः इति लघुरुद्र एवं शतीशतहोमे एकधापक्षे नमकाध्यायेनैका
चमकैः सह तिस्रस्त्रयोदशावा आवृत्तयः अत्रास्मिन्नेव पक्षे अवशिष्ट
रूपाणि शतां शतहोमाभावः तत्रैव त्रेधाविभागपक्षे रूपकस्य तिस्रः
अवशिष्टैकविंशतिरूपाणामेका चमकैः सह षट्षोडशावा तत्रैव षो
ढापक्षे रूपकस्य षट् अन्या चैका चमकैः सह नव एकोनविंशतिर्वा

तत्रैव षोडशधापक्षे रूपस्य षोडश अन्यास्तिस्रः चमकैः सह एकविंश
तिरेकत्रिंशद्वा तत्रैवाष्टाचत्वारिंशद्धापक्षे रूपस्याष्टाचत्वारिंशत्
अन्या दश चमकैः सह षष्टिसप्ततिर्वा तत्रैवैकोनसप्तत्युत्तरशतपक्षे
रूपस्यैतावत्यः अन्याः पंचत्रिंशत् चमकैः सह षडुत्तरं षोडशाधिकं वा
शतद्वयमिति अवशिष्टरूपस्य रूपकमेव विभागाः प्रागुक्ताः महारुद्रे सम
स्तहोमे एकधाविभागेन नमकानां सहस्रमेकं त्रीणि शतानि एकविंशच्चा
वृत्तयः चमकानां सहस्रं चतुःशीतीद्विपंचाशच्चेति सर्वाः सहस्रे द्वे सप्त
शतानि त्र्यशीतिश्च तत्रैव त्रेधाविभागेन नमकानां त्रीणि सहस्राणि नव श

नित्रिनवतिश्च चमकैः सह पंचसहस्राणि चत्वारिंशतानि पंचचत्वारिंशच्च
तत्रैव षोडशविभागे नमकानां सप्तसहस्राणि नवशतानि षडशीतिश्च चमकैः
सह नवसहस्राणि चत्वारिंशतानि अष्टत्रिंशच्च तत्रैव षोडशधा विभागे
नमकानामेकविंशतिसहस्राणि द्विशतेषं एव निराकृतयः चमकैः सह
द्वाविंशतिसहस्राणि सप्तशतान्यष्टचत्वारिंशच्च तत्रैवाष्टाचत्वारिंश
द्धाविभागे नमकानां त्रिषष्टिसहस्राणि अष्टौ शतान्यष्टाशीतिश्च चमु
कैः सहद्वाविंशति पंचषष्टिः सहस्राणि त्रीणि शतानि चत्वारिंशच्च तत्रै
वएकोनसप्तत्युत्तरशतधाविभागे नमकानां द्वेलक्षे चतुर्विंशतिसहस्राणि न

वशतानि एकोनचत्वारिंशच्च चमकैः सह द्वेलक्षे षड्विंशतिसहस्राणि त्रीणि शता
नि एकनवतिश्च महारुद्रे दशहोमे एकधाविभागे नमकानामेकं शतं त्र
यस्त्रिंशच्च रूपकाणीति तावंत्य आकृतयः चमकानां द्वादशरुद्रीषावृत्त्या
त्रयस्त्रिंशत्तमरूपयोजनेन च द्वे द्वादशावृत्तिसर्वा द्विशते एकोनाशीतिरेको
ननवतिर्वा तत्रैव द्वेधाविभागे नमकानां त्रीणि शतानि नवनवतिश्च म
कैः सह पंचशतानि पंचचत्वारिंशच्च पंचाशद्वा तत्रैव षोडशधा विभागे
नमकानां सप्तशतानि अष्टनवतिश्च चमकैः सह नवशतानि चतुश्चत्वारिंश
च्चतुःपंचाशद्वा एषु त्रिषु अपि पक्षेषु अवशिष्टरूपाणां दशांशो नास्ति तत्रैव षोडश

धाविभागेननमकानांद्वेसहस्रेएकंशतमष्टाविंशतिंच अवशिष्टरूपस्यद्वेचम
कैःसहद्वसहस्रेद्वेशतेषट्सप्ततिःषडशीतिर्वा तत्रैवाष्टाचत्वारिंशद्धाविभागे
नमकानांषट्सहस्राणित्रीणिशतानिचतुरशीतिश्च अवशिष्टरूपेपंचचम
कैःसहषट्सहस्राणिपंचशतानिपंचत्रिंशत्पंचचत्वारिंशद्धा तत्रैवएको
नसप्तत्युत्तरशतविभागेननमकानांद्वाविंशतिसहस्राणिचत्वारिंशतानि
सप्तसप्ततिश्च अवशिष्टरूपेसप्तदश चमकैःसहद्वाविंशतिसहस्राणि
पंचशतानिचत्वारिंशत्पंचाशद्वेति महारुद्रेशतानांद्वाडशमेएकधाविभा
गे त्रयोदशरूपाणिशतानांशतइतितावत्य आवृत्तयः चमकानांत्वेकादशि

न्यांद्वादशरूपद्वयेचमकानांप्रत्येकंद्वेद्वादशचेतिचतस्रश्चतुर्विंशतिर्वा सर्वा
एकोनत्रिंशदेकोनपंचाशद्वा अत्रास्मिन्नेवपक्षे अवशिष्टरूपाणांशतांशो
नास्ति तत्रैवत्रेधाविभागेननमकानामेकोनचत्वारिंशदवशिष्टैकत्रिंशद्रू
पाणांचैकाचमकैःसहषट्पंचाशत्षट्सप्ततिर्वा तत्रैवषोढाविभागेननमकानां
मष्टसप्ततिः अवशिष्टरूपाणांद्वाचमकैःसहषण्णवतिःषोडशाधिकंशतंवा
तत्रैवषोडशधाविभागेद्वेशतेष्टचौ अवशिष्टरूपाणांपंचचमकैःसहद्वे
शतेएकोनत्रिंशदेकोनपंचाशद्वा तत्रैवाष्टाचत्वारिंशद्धाविभागेनमका
नांषट्शतानिचतुर्विंशतिश्च अवशिष्टरूपाणांपंचदशचमकैःसहषट्श

तानिपंचपंचाशतंचनवतिर्वा तत्रैवैकोनसप्तत्युत्तरशतधाविभागेनमका
नींद्वेसहस्रेएकशतंसप्तनवतिश्च अवशिष्टरूपाणांद्विपंचाशत् चमकैःस
हद्वेसहस्रेद्वेशतेपंचषष्ठिःपंचाशीतिर्वेति अतिरुद्रेसमग्रहोमेएकधाप
क्षेचतुर्दशसहस्राणिषट्शतानि एकचत्वारिंशच्चरूपकाइतितेषांताव
त्यआहुतयः चमकानांचप्रत्येकंरुद्रीद्वादशोत्तिपंचदशसहस्राणिनव
शतानिद्विसप्ततिश्च सर्वास्त्रिंशत्सहस्राणिषट्शतानित्रयोदशधाहु
तयः तत्रैवत्रेधापक्षेरूपाणांत्रिचत्वारिंशत्सहस्राणिनवशतानित्रयो
विंशतिश्चमकैःसहैकोनषष्ठिसहस्राणिअष्टौशतानिपंचनवतिश्च

तत्रैवषोडापक्षेरूपकाणांसप्ताशीतिसहस्राण्यष्टौशतानिषट्चत्वारिंशत्
चमकैःसहलक्षमेकंत्रीणिसहस्राणिअष्टौशतान्यष्टादश तत्रैवषोडश
धापक्षेरूपाणांद्वेलक्षेचतुस्त्रिंशत्सहस्राणिद्वेशतेषट्पंचाशच्च च
मकैःसहद्वेलक्षेपंचाशत्सहस्राणिद्वेशतेषण्णवतिश्च तत्रैवाष्टा
चत्वारिंशत्पक्षेरूपाणांसप्तलक्षाणिद्वेसहस्रेसप्तशतान्यष्टषष्ठिश्च
चमकैःसहसप्तलक्षाण्यष्टादशसहस्राणिसप्तशतानिचत्वारिं
शच्च तत्रैवैकोनसप्तत्युत्तरशतपक्षेचतुर्विंशतिलक्षाणिचतुः
सप्ततिसहस्राणित्रीणिशतानिएकोनविंशच्च चमकैःसहच

तुर्विंशतिस्सहस्राणिनवतिसहस्राणित्रीणिशतान्येकाचेति अति
रुद्रेदशांशहोमेएकधापक्षेनमकानामेकंसहस्रंचत्वारिंशतानिच
तुःषष्टिश्चाहुतयः चमकानुवाकानांप्रतिरूपयोजनेएकंसहस्रंपंच
शतानिषण्णवतिः अवशिष्टरूपेचद्वेद्वादशावेति सर्वाःत्रीणिसह
स्राणिद्विषष्टिर्वासप्ततिर्वा तत्रैवत्रेधापक्षेनमकानांचत्वारिसहस्रा
णित्रीणिशतानिद्वानवतिश्च चमकैःसहपंचसहस्राणिनवशतानि
नवतिःशतंवा तत्रैवषोढापक्षेनमकानामष्टौसहस्राणिसप्तदशश
तानिचतुरशीतिश्च चमकैःसहदशसहस्राणित्रीणिशतानिद्वाशीति

द्वानवतिर्वा एषुत्रिष्वपिपक्षेषुमूलावशिष्टरूपदशांशाभावः तत्रैवषो
डशधापक्षेनमकानांत्रयोविंशतिसहस्राणिचत्वारिंशानिचतुर्विं
शतिश्च मूलावशिष्टरूपस्यद्वेचमकैःसहपंचविंशतिसहस्राणिच
तुर्विंशतिश्चतुस्त्रिंशद्वा तत्रैवाष्टाचत्वारिंशत्पक्षेनमकानांसप्त
तिसहस्राणिद्वेशतेद्वासप्ततिश्च मूलावशिष्टरूपस्यचपंचचमकैः
सहैकसप्ततिसहस्राणिअष्टौशतानिपंचसप्ततिःपंचाशीतिर्वा
तत्रैवैकोनसप्ततत्यक्षरत्वात्पक्षेनमकानांद्वेलक्षेसप्तचत्वारिं
शत्सहस्राणिचत्वारिंशताषोडशवा मूलावशिष्टरूपस्यचसप्तदश

चमकैः सहद्वेद्वेएकोनपंचाशत्सहस्राणिएकत्रिंशदेकचत्वारिंशद्भवंति
अतिरुद्रेशतांशहोमेएकधाविभागेननमकाकोरशतंषट्चत्वारिंशच्चभवे-
तितेषांतत्पत्स्यआवृत्तयः अवशिष्टैकचत्वारिंशद्रूपाणिशतांशेनभ-
वंति चमकानांत्रयोदशरुद्रीद्वैकेशतंषट्पंचाशच्च रूपकत्र-
येद्वेद्वादशावृत्तिषट्पंचाशद्वेतिसर्वास्त्रीणिशतान्यष्टावष्टत्रिंशद्भ
तत्रैवत्रेधाविभागेननमकानांचत्वारिंशतान्यष्टत्रिंशच्च अवशिष्ट-
रूपाणिमेकाचमकैःसहषट्शतानिएकत्रिंशद्भवा तत्रैवषोडशविभा-
गेननमकानामष्टौशतानिषट्सप्ततिश्च अवशिष्टरूपाणिद्वेचमकैः

सहएकंसहस्रंचत्वारिंशत्सप्ततिर्वा तत्रैवषोडशधाविभागेननमकानां
द्वेसहस्रेत्रीणिशतानिषड्विंशच्च अवशिष्टरूपाणिसप्तचमकैःस-
हद्वेसहस्रेपंचशतानिपंचपंचाशिंशद्भवा तत्रैवाष्टाचत्वारिंशद्धावि-
भागेननमकानांसप्तसहस्राणिअष्टौच अवशिष्टरूपाणिविंशतिः
चमकैःसहसप्तसहस्राणिएकंशतंनवतिश्चशतद्वमीविंशतिश्चवा
तत्रैवैकोनसप्तत्युत्तरशततधाविभागेननमकानांचतुर्विंशतिसहस्राणि
षट्शतानिचतुःसप्ततिश्च अवशिष्टरूपाण्येकोनसप्ततिः चमकैःस-
हचतुर्विंशतिसहस्राणिनवशतानिपंचपंचाशद्भवंति एवंकेचिद्रुद्रहो-
मसंख्याविहिता अन्यैस्तुयच्चप्रागुक्तसंख्यातोऽधिकंरूपकमवशिष्यते

तत्रैव समग्ररूपकेण होमः यत्र त्वाहुतयो वशिष्यन्ते तत्र षडाहुतिपर्यन्तमाधे
स्त्रिंशत्रिंशत्रैस्त्रिश्च आहुतयः अंत्ये त्रिंशत्रिंशत्तः यत्र तु षडधिका अव
शिष्यंते तत्रैव रूपकेण होमः रूपके च द्वे द्वादशावाचमकाहुतयः एवं च
किंचिदधिकमात्रहोमे संपद्यते न तु प्रागुक्तरूपकद्वंत्वप्रयोगं न तु केव
ले होमलोपो भवतीत्युक्तं अस्मिंश्च पक्षे प्रागुक्तसंख्यया पाससंख्येकीरु
द्रयोज्या एवं च रुद्रहोमेनुक्तेषु नेकप्रकारेषु यत्र यत्राहुतिसंख्या
धिक्यं आहुतिपरिमाणाधिक्यं वा तत्र तत्र फलतारतम्यं द्रष्टव्यं एवं
रुद्रहोमं विधाय कुंडसमीपस्थानात् प्रागुक्तपंचांगन्यासं कुर्यात् केचि
गादिपक्षेतु सर्वेप्येवमेव कुर्युः ततः आचार्य आचाराद्यजमानो वा प्रा

दे
गुक्तरुद्रपीठदेवताभ्यस्तत्तन्नाममंत्रैराज्यं स्रुवेण जुहुयात् एवं च होम
द्रव्यमध्ये मेखलायां भूमौ च पतितं मग्नौ न निक्षिपेत् मध्यमोपरिमेख
लयोः पतितस्य परिधिपरिस्तरणान्तर्गतत्वेनाग्निप्रक्षेपार्हत्वात् तद
तिरिक्तस्थानतः प्रक्षेपनिषेधाच्चेति होमप्रकारः संक्षेपः एवं होमं परि
समाप्य चंदनाद्युपचारैरग्नेनयेति मंत्रेण संकल्प्य पूर्ववत् स्वाहास्वधा
युतमग्निं पूजयेत् अग्नये गंधादि बहिरेव दद्यात् ततो ग्रहपीठ
देवतानां रुद्रपीठदेवतानां च उत्तरपूजां केचिदाहुः पूजां संपूर्तौ वा
चयित्वा यस्य स्मृत्या० आवाहनं न जानामीत्युक्तो स्विष्टकृदया
ज्ञेत्यादि नवकृत्वो श्रुत्वा बलिदानं कुर्यात् तत्रैव भग्न्यायतनस्य स

मंतादिक्षु विदिक्षु च माषभक्तबलिं सदीपं दिक्पालेभ्यो दद्यात् त्रातार
मिंद्रं गर्गस्त्रिष्टुप् इंद्रप्रीत्यर्थे बलिदाने विनियोगः त्रातारमिं० इंद्रा
य सांगाय सपरिवाराय सायुधाय सशक्तिकायैष माषभक्तबलिर्नमः
भोभो इंद्र दिशां रक्ष बलिं भक्ष मम यजमानस्य सवासकुटुंबस्यायुःक
र्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्त्ता भवेति पुष्पाक्षतत्यागः निपूर्वाग्निमु
खस्य हेतु अग्निं कण्वो मेधातिथिरग्निर्गायत्री अग्निप्रीत्यर्थं बलि
दाने विनियोगः अग्निं दूतं० अग्नये इत्यादि भोभो अग्ने इति ततो
दक्षिणे यमाय सोमं यमो यमोऽनुष्टुप् यमप्रीत्यर्थं बलिदाने वि० य
माय सं० यमाय सांगायेत्यादि ततो नैर्ऋत्ये मोषुणो घोरः कण्वो निर्ऋ

तिर्गायत्री निर्ऋतिप्रीत्यर्थं बलिदाने वि० मोषुणः० निर्ऋतिरित्यादि त
तः पश्चिमे तत्वायामि शुनःशेपो वरुणस्त्रिष्टुप् वरुणप्रीत्यर्थं० तत्वाया
मि० वरुणायेत्यादि ततो वायव्ये तव वायो व्यश्वो वायुर्गायत्री वायु
प्रीत्यर्थं० तव वाय० वायवे सांगायेत्यादि ततः उत्तरे सोमो धेनुं गौ
तमः सोमस्त्रिष्टुप् सोमप्रीत्यर्थं० सोमो धेनुं० सोमायेत्यादि ततः ई
शान्ये तमीशानं गोतम ईशानो जगती ईशानप्रीत्यर्थं० तमीशा
नं० ईशानायेत्यादि ततः ईशानपूर्वयोर्मध्ये आयंगौः सार्पराज्ञी अ
नंतो गायत्री अनंतप्रीत्यर्थं० आयंगौः अनंतायेत्यादि केचित्तु तत्र
स्योनामेधातिथिर्भूमिर्गायत्री स्योनापृथिवीत्यनेनानंतबलिमाहुः त

तःपश्चिमनैर्ऋत्यमध्ये पश्चिमनैर्ऋत्यमध्ये ब्रह्मज्ज्ञानंगौतमोवामदे
वो ब्रह्मात्रिष्टुप् ब्रह्मप्रीत्यर्थं० ब्रह्मणेसांगायेत्यादि ततोग्न्यदेवेशाःस
मेता तत्रनदबलयोदेयाः तत्रपूर्वे आकृष्णेनेत्यादित्यायसांगायस
परिवारायअग्निरूपाधिदेवताप्रत्यधिदेवतासहितायेमंमाष
नक्तबलिंसमर्पयामीतिपुष्पाक्षतगंधदीपेत रवेइमंबलिंगृहाण
ममयजमानस्यवाराग्नितिकर्त्रीभवेत्यादि एवमुत्तरत्रापि ततोवे
धामाये आप्यायस्वगौतमःसोमोगायत्री सोमप्रीत्यर्थं० आप्यायस्व०
सोमायउमारूपाधिदेवताप्रत्यधिदेवतासहितायेत्यादि ततो
दक्षिणे अग्निर्मूर्द्धाविरूपोंगारकोगायत्री अंगारकप्रीत्यर्थं

अग्निर्मूर्द्धा० भौमायस्कंदअग्निरूपाधिदेवताप्रत्यधिदेवतासहिताय० तत
ईशान्यां उद्बुध्यध्वंबुधःसौम्योबुधस्त्रिष्टुप् बुधप्री० उद्बुध्यध्वं० बुधायनाराय
णविष्णुरूपाधिदेवताप्रत्यधिदेवतासहिताय० ततउत्तरे बृहस्पतेगृत्स
मदोबृहस्पतिस्त्रिष्टुप् बृहस्पतिप्री० बृहस्पते० बृहस्पतयेब्रह्मेंद्ररूपाधिदे
वताप्रत्यधिदेवतासहिताय० ततःपूर्वे शुक्रःपाराशरःशुक्रोद्विपदाविरा
ट् शुक्रप्रीत्यर्थं० शुक्रः शुशुक्वान् शुक्रायेंद्राणीरूपाधिदेवताप्रत्यधिदे
वतासहिताय० ततःपश्चिमे शमग्निरिरिंबिठिःशनिरुष्णिक् शनिप्री
त्यर्थं० शमग्नि० शनयेयमप्रजापतिरूपाधिदेवताप्रत्यधि० ततो

नैरृत्यां कयानोवामदेवोराहुर्गायत्री राहुप्रीत्य० कयांनश्चि० राहवेकालस
र्पिरूपाय० ततोवायव्ये केतुंमधुछंदाः केतवोगायत्री केतुप्री० केतुंकृण्व
न्० केतवे चित्रगुप्तब्रह्मरूपाधिदेवताप्रत्यधिदेवतास० अथपूर्वोक्त
रतोगणपत्यादिपंचकस्य गणानांत्वागृत्समदोगणाधिपतिर्जगती
गणपतिप्रीतये० गणानांत्वा० गणाधिपतयेसांगाय ऋद्धिबुद्धिसहि
तायेमंमाषभक्तेत्यादि जातवेदसेकश्यपोदुर्गात्रिष्टुप् दुर्गाप्री० दु
र्गायेत्यादि वायोशतंगौतमोवामदेवोवावायुरनुष्टुप् वायुप्रीतये० वा
योशतं० वायवेइत्यादि आदित्प्रत्नस्याकाशोगायत्री आकाशप्रीत्यै० आ

काशाये० एषोउषाप्रस्कण्वोश्विनौगायत्री अश्विप्री० अश्विभ्यामि० ततोवा
स्तोष्पतिबलिः वास्तोष्पतेवसिष्ठोवास्तोष्पतिस्त्रिष्टुप् वास्तोष्पतिप्री० वास्तो
ष्पते० वास्तोष्पतयेइत्यादि ततोरुद्रपीठस्याग्नेये कद्रुद्रायघोरःकण्वोरु
द्रोगायत्री रुद्रप्री० रुद्रायोमासहितायसांगायेत्यादि ततोमहाबलिं
कुंकुमादिरक्तंरक्तपुष्पादियुतंसदीपंसदक्षिणंक्षेत्रपालायदद्यात्
क्षेत्रस्यवामदेवःक्षेत्रपालोनुष्टुप् क्षेत्रपालप्रीतये० क्षेत्रस्यपति०
क्षेत्रपालायभूतप्रेतपिशाचराक्षसशाकिनीडाकिनीवेतालादिपरि
वारयुतायेमंबलिंसमर्पयामि भोभोक्षेत्रपालइमंबलिंगृहाणम

मयजमानस्यवायुः कर्त्ताद्धोमकर्त्ताशुभकर्त्ताशांतिकर्त्तापुष्टिदस्तुष्टिदोभ
वेति रक्तंबलिंश्रद्धोएदुर्ब्राह्मणेनवाचतुष्पथेक्षेपयेत् ततःप्रक्षालित
पादआचम्य देशकालौस्मृत्वाऽत्रतस्यामुकहोमस्यपूर्णतासिद्ध्यर्थंपूर्णा
हुतिहोमंकरिष्ये इतिसंकल्प्य स्रुचिद्वादशगृहीतंचतुर्गृहीतंवाज्यंहुत्वा
वस्त्रयुतंनारिकेलादिफलंचंदनमाल्यादियुतंतदुपरिनिधायपूर्णाहुतिंय
जमानान्वारब्ध आचार्योजुहुयात् तत्रमंत्राः समुद्रादूर्मिरिति त्रचस्यगौ
तमोवामदेवोग्निस्त्रिष्टुप् पूर्णाहुतिहोमेविनियोगः समुद्रादूर्मिः० ३
मूर्द्धानंदिवोबार्हस्पत्योभरद्वाजोवैश्वानरस्त्रिष्टुप् पूर्णाहुः १ पुनस्त्वाग्नि

र्वसुरुद्रादित्यास्त्रिष्टुप् पूर्णाहु० पुनस्त्वादित्याः० पूर्णादर्विविश्वेदेवाः श
तक्रतुरनुष्टुप् पूर्णाहु० पूर्णादर्वि० सप्ततेअग्नेसप्तवानग्निर्जगती
पूर्णाहु० सप्ततेअग्ने धामंतेवामदेवआपोजगती पूर्णाहुति० धा
मंतेविश्व० स्वाहाकारेणाग्नौक्षिपेत् पूर्णाहुतिमुत्तमांजुहोतीतिप
ठेयुः यजमानस्तु इदमग्नयेवैश्वानरायवसुरुद्रादित्येभ्यःशतक
तवेसप्तवतेग्नयेद्युभ्यश्चनममेतित्यागंकुर्यात् ततोवसोर्धारा
तत्रायंप्रकारः वह्नेरुपरिस्तंभद्वयविधृतांमौदुंबरींस्रुचीमकोटरांबाहु
प्रमाणामार्द्रांस्रिचंप्रागग्रांनिधायतदुपरिश्वेतंखलंविधृतेनतन्निर्मलघृतपूरि

तेनतान्नमन्नदादिकं भेनाद्योयवमात्रछिद्रेणाज्यंमुंचताग्नेरुपरिवसोर्द्धा
रांपातयेत् तस्यांचघृतधारायांस्रुक्युणाज्जिकयाग्नौपतंत्यांचमकाना
ग्नेयादीनिचसूक्तानिश्रावयेत् तत्रकूयवाश्वमश्त्ययंमंत्रोद्वादशवा
रमावर्त्तनीयः चमकानुवाकानामग्निःकाकांउऋषिः आद्याआग्नावै
ष्णवीगायत्रीशिष्टंयजुः वाजादयोन्नादिविशेषादेवताःवसोर्द्धारायांवि
नियोगः अग्निमीळेनेवानां विष्णोर्नुकंषण्णी दीर्घतमाविष्णुस्त्रिष्टुप्
वसोर्द्धा० आतेपितरितिपंचदशानांगृत्समदोरुद्रस्त्रिष्टुप् आतेपितः १५
स्वादिष्ठयेतिदशानांमधुछंदाःसोमोगायत्री वसो० स्वादिष्ठया १० महावैश्वा

नरंनाममहावैश्वानराख्येयोंआरण्यकेषष्ठसाम्पाठकेसामद्वयं तस्यवैश्वा
नऋषिर्वैश्वानरोदेवतात्रिष्टुप्छंदः वसोर्द्धारा० सामाभावेतदृङ्मात्रंप
ठेत् एतच्चोपलक्षणं तेनान्येदप्याग्नेयादियथाभ्यासंपठेन्न किंत्वेकमेवो
पादेयगातैकवचनस्य विवक्षितत्वात् ततोवसोर्द्धारांजुहोतीत्यनुवाकम
पिपठंति एवंवसोर्द्धारांविधाययथाशाखंपूर्णपात्रविमोकादिकर्मशेषंसमाप
येदाचार्यः तदनंतरंवरणक्रमेणऋत्विजः प्रतिनिधयश्चोदङ्मुखाःप्रांङ्मुख
यजमानहस्तेश्रेयःसंपादनंकुर्वंति तत्रैव शिवाचारिष्टंचास्त्वित्युक्ताः दी
र्घमायुःश्रेयःशांतिःपुष्टिस्तुष्टिश्चास्त्वितिपुनरुक्ते मयाभवन्नियोगेनम

हारुद्रादिमध्येयुष्मीशेनयः कृतोऽयमस्तद्वंशांशेनानुकंपश्चेणचयः कृतोऽहो
मस्तस्मात्कृपाद्वेमाश्चयदुत्पन्नंश्रेयस्तेभ्यमहंसंप्रददइति रदानिर्मूल्लत्वा
यजमानप्रतारणमात्रमेव तदनंतरमग्नेः पश्चिमभागेप्राङ्मुखोपवि
ष्टेयजमानउदङ्मुखानाचार्यादीन्पूजयित्वावरणक्रमेणदक्षिणांदद्यात्
तद्यथा अद्येत्यादि कृतस्यमहारुद्रादिकर्मणः सांगतासिद्धयेआचार्यादि
न्पूजयिष्येइतिसंकल्प्य श्रीमहारुद्रस्वरूपिणेआचार्यायेदंपाद्यमिदंवाद
स्त्यैवासोयुगलमित्यादि गंधपुष्पधूपदीपतांबूलानिदत्वा
पूर्वोक्तविशेषणवतिकालेदेशेच कृतस्यमहारुद्रादिकर्मणः प्रतिष्ठासि

गोरत्नाद्वेतान्निष्क्रयत्वेन निष्कंतदर्द्धंतदर्द्धं वास्तुवर्णंशक्त्यादद्यात् ततोद्वारजा
पकेभ्योपिदक्षिणांदेयाः ततोनानावेदांतर्गतिनानाशाखाध्यायिभ्योनानागो
त्रेभ्योनानाशर्मेभ्योब्राह्मणेभ्योदीनानाथेभ्यश्चयथाशक्तित्वयसीदक्षिणां
दातुमुत्सृजेन्नममेतिसंकल्प्य शाकंतज्जलं क्षिप्त्वा ॐतत्सदितिनिवदेत् तदनं
तरंग्नत्नवेदिसमीपस्थकलशोदकेरुद्रकलशोदकेन नाचाराद्वारकलशो
दकेन दूर्वापंचपल्लवैरुदङ्मुखआचार्यारुत्विजस्तिष्ठंतः प्राङ्मुखंसुखंसकुटुं
बमुपविष्टंयजमानमभिषिंचेयुः अभिषेकेपत्नीवामभागे अभिषे
कसमयेगीतवाद्यादिमंगलघोषः कार्यः समुद्रज्येष्ठाइतिचतसृणां

घार्थं अमुकगोत्रायामुकवेदांतर्गतामुकशाखाध्यायिनेमुकशर्मणे आचा
र्याय यथाशक्त्यालंकृतामिमां सवत्सां गां रुद्रदैवत्यां इदं च हिरण्यमग्निदै
वतं तुभ्यं संप्रददे इति कुशाक्षतसहितं जलं द्विजहस्ते निक्षिप्य न मम इति निवे
देत् द्विजस्तु स्वस्तीत्युक्त्वा कामस्तुतिं क इदं कस्मा अदादित्यादिकां स्वशा
खांतरस्थां पठेत् एवं ब्रह्मपूजां विधाय दक्षिणां च दत्वा ऽनंतरं ग्रहजापकेभ्यः
पूजापूर्वकं ग्रहदक्षिणा देयाः अनंतरं ऋत्विजोपि पूजयित्वा संकल्पपूर्वकं
दक्षिणां दद्यात् प्रतिनिधिपक्षे पारितोषिकं दद्यात् यथाशक्त्या आचार्यादि
भ्यो ऽलंकारमुद्रिकोदकपात्रोपानध्वजनछत्रचामरादि उपकरणानि दद्यात्

वसिष्ठ आपस्त्रिष्टुप् अभिषेके विनियोगः समुद्रज्येष्ठाः ४ आयं ता
मिंद्र देवा इत्यादि अक्षीभ्यामित्यादि च अन्येपि स्वशाखोक्त मंत्रा ग्राह्याः
पौराणास्तु सुरास्त्वामभिषिंचंतु ब्रह्मा विष्णु महेश्वराः वासुदेवो जगन्ना
थस्तथा संकर्षणो विभुः प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते आखं
डलोग्निर्भगवान् यमो वै निर्ऋतिस्तथा वरुणः पवनश्चैव धनाध्यक्ष
स्तथा शिवः ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु ते सदा कीर्ति
र्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः बुद्धिर्लज्जा वपुः शांतिस्तु
ष्टिः कांतिश्च मातरः एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः

आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः ॥ ग्रहास्त्वामभिषिंचंतु रा
हुः केतुश्च तर्पिताः ॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः ॥ ऋष
यो मुनयो गावो देवमातर एव च ॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्स
रसां गणाः ॥ अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि च ॥ औषधा
नि च रत्नानि कालस्यावयवाश्च ये ॥ सरितः सागराः शैलास्तीर्थानि
जलदा नदाः ॥ एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये ॥ एवमभि
षेकानंतरं सर्वौषधीरनुलिप्य शुद्धोदकेन स्नात्वा शुक्लमाल्यांब
रानुलेपनधरः सपत्नीको यजमानो ग्रहपीठदेवतानां रुद्रपीठदेव

तानां च गंधाद्युपचारैरुत्तरपूजां दक्षिणां नमस्कारांतां निर्वर्त्य पुष्पांजलिं दत्वा
आवाहनं न जानामि न जानामि विसर्जनं पूजां० अपराधसहस्राणि० यस्य
स्मृत्या० मंत्रहीनं० इति पीठद्वये क्षमाप्य उत्तिष्ठ ब्रह्मणस्पते अभ्यारमिदद्रयः
यांतु देवगणाः सर्वे पूजामादाय पार्थिवात् इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय
चेति पुष्पाक्षतप्रक्षेपेण ग्रहपीठदेवता विसर्ज्य एवमेव रुद्रपीठदेवता विस
र्जयेत् ग्रहपीठं पूर्णोपस्करयुतमाचार्याय दत्वा रुद्रपीठमपि सोपस्करं
रुद्रप्रतिमां चाचार्याय दद्यात् तत्र प्रतिमादानमंत्रः श्रीरुद्रप्रतिमां
स्वर्णमयीं वस्त्रयुगान्वितां धान्यैर्ददामि श्रीरुद्रप्रीतये चापि प्रा[illegible]नि

ष्टनिवृत्तये प्रार्थिताभीष्टसंसिद्ध्यै तुभ्यं श्रीरुद्ररूपिणे संप्रददे विधाने
न यथोक्तफलमलुकमश्नुते यदा तु मारकतं लिंगं तदा दानमंत्रः इदं
मारकतं लिंगं गौरीपीठसमन्वितं संप्रददे विधानेन यथोक्तफल
मस्तक ने काश्मीरं लिंगपक्षे तु इदं मारकतमित्यत्र इदं काश्मीरजमिति
प्रयोज्यं द्वादश

१ नंदिना राजतेनापि श्वेतवस्त्रयुगान्वितं धान्यैर्द्वादशभिर्युक्तं नैका
दशफलान्वितं ३ द्वादशधान्यानि व्रीहियवमाषतिलमुद्गखल्वगो
धूममसूरप्रियंगुश्यामाकनीवाराः तेषां मानं तु प्रस्थाधिकं द्रोणं

वा यथाशक्तिग्राह्यं उक्तधान्याभावे यथासंभवं ग्राह्याणि ततो
ग्निं संपूज्य गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर यत्र ब्रह्मादयो दे
वास्तत्र गच्छ हुताशनेत्यग्निं विसर्ज्य सर्वा इमं उपदेवता द्वारदेवता
श्चयां तु देवगण इति विसर्ज्य ध्वजपताकाछत्रोपस्करयुतं मंडपमाचा
र्याय दद्यात् इमं मंडपं ध्वजपताकाछत्रोपस्करयुतं तुभ्यमहं संप्रददे
न मम इति स्वस्तीति सः प्रतिब्रूयात् ततः कृतस्य महारुद्रादिकर्मणः
संपूर्णतासिद्धये यथोपपन्नेनान्नेन यथाकालं नानागोत्रान् अमुकशर्म
णोऽमुकसंख्याकान् ब्राह्मणान् भोजयिष्ये इति संकल्प्य यथोक्तान् ब्रा

णान्भोजयेत् भूरिदक्षिणासंकल्पानंतरं वा ब्राह्मणभोजनसंकल्पः
रूपैकरुद्रस्य त्रयः १ लघुरुद्र एकादश ११ महारुद्रे एकविंशत्युत्तरं
शतं १२१ अतिरुद्रे १३३१ त्रयोदशशतान्येकत्रिंशच्चेति १३३१
ततो ब्रह्मार्पणं ब्रह्म हविः चतुर्भिश्च चतुर्भिश्चेत्युक्त्वा मया यत्कृ
तं यथाकालं यथादेशं यथाज्ञानं यथाशक्ति च महारुद्रादिकर्म ते
न श्रीपरमेश्वरः प्रीयतां ॐ तत्सद्ब्रह्मार्पणमस्तु । इति कृतांजलिः क्षि
पेत् ततः सदस्यांश्चंदनाक्षतपुष्पवस्त्रतांबूलदक्षिणाभिः पूजयित्वा
अंजलिं बद्ध्वा मया यत्कृतं महारुद्रादिकर्म तत्कालहीनं शक्तिहीनं श्र

द्धाहीनं च भवतां ब्राह्मणानां वचनात्सर्वं संपूर्णमच्छिद्रं चास्तु इति प्रार्थयेत् ॥ ततः सं
पूर्णमस्त्वच्छिद्रमस्त्विति सर्वे वदेयुः ॥ ततस्तेषामाशिषो गृहीत्वा तान्सानु
नयं विसृज्य ब्राह्मणान्भोजयित्वा ॥ दीनानाथांश्चान्नादिना संतोषयित्वा
स्वयं सुहृन्मित्रादियुतः सोत्साह ॥ संतुष्टो भुंजीत तदविघ्नमेवेति ॥
रामेश्वरभट्टात्मजनारायणभट्टसूरिणा कार्या ॥ कर्मणि सकलेत्वेषु रुद्रानुष्ठा
नपद्धती रचिता ॥ ग्रंथानन्नेकानालोच्य विचारसदसच्चयः ॥ लिखितं
मारंकरमयाशंकरनागरब्राह्मणस्तत्ववासि संवत् १८७५ ना चैत्रव
सुद ६ बुधे

॥श्रीगणेशायनमः॥ विश्वेश्वरंसांबमूर्त्तिंप्रणिपत्यगिरंगुरुं॥ सिद्धांतकौमुदीव्याख्याक्रियतेतत्त्वबोधिनी॥१॥
॥मुनित्रयंनमस्कृत्यतदुक्तीःपरिभाव्यच॥ वैयाकरणसिद्धांतकौमुदीयंविरच्यते॥